# MP BOARD CLASS 9 EXAM 2016
## संस्कृत (सामान्य) : कक्षा IX

प्रश्न १. उचितविकल्पं चित्वा लिखत— 1 × 5 = 5

(i) 'प्रत्येकः' इत्यस्मिन् पदे सन्धिः अस्ति—
(अ) वृद्धिः सन्धि (ब) अयादि सन्धिः (स) यण् सन्धिः (द) विसर्गसन्धिः।

(ii) व्यञ्जनसन्धेः उदाहरणम् अस्ति—
(अ) जगदीशः (ब) सुरेशः (स) सदैव (द) इत्यादिः।

(iii) मनः + रथः = ............... भवति।
(अ) मनारथः (ब) मनूरथः (स) मनोरथः (द) मनौरथः।

(iv) 'सदैव' एतस्य पदस्य सन्धि-विच्छेदः भवति—
(अ) सत् + एव (ब) सदै + व (स) सद + एव (द) सदा + एव।

(v) अधोलिखितेषु अव्ययम् अस्ति—
(अ) बालकः (ब) अहम् (स) तदा (द) रमा।

प्रश्न २. उचितविकल्पं चित्वा लिखत— 1 × 5 = 5

(i) 'तत्पुरुष' समासस्य उदाहरणम् अस्ति—
(अ) महापुरुषः (ब) राजपुरुषः (स) यथाशक्ति (द) त्रिलोकी।

(ii) 'रामलक्ष्मणौ' इत्यस्य पदस्य समासविग्रहः भवति—
(अ) रामश्च लक्ष्मणश्च (ब) रामंलक्ष्मणंच
(स) रामलक्ष्मणः (द) रामौ लक्ष्मणौ।

(iii) 'त्रिभुवनम्' इत्यस्मिन् पदे समासः अस्ति—
(अ) द्वन्द्व समासः (ब) द्विगु समासः
(स) कर्मधारय समासः (द) बहुव्रीहि समासः।

(iv) अधोलिखितेषु पदेषु उपसर्गयुक्तपदम् अस्ति—
(अ) तव (ब) विरच्य (स) पश्यामि (द) हसामः।

(v) 'आगतः' इत्यस्मिन् पदे उपसर्गः अस्ति—
(अ) आ (ब) तः (स) अ (द) गतः।

प्रश्न ३. उचितविकल्पं चित्वा लिखत्— 1 × 5 = 5

(i) 'पठामः' इत्यस्मिन् पदे वचनम् अस्ति—
(अ) एकवचनम् (ब) द्विवचनम् (स) बहुवचनम्।

(ii) 'भवतु' इत्यस्मिन् पदे पुरुषः अस्ति—
(अ) प्रथम पुरुषः (ब) मध्यमपुरुषः (स) उत्तमपुरुषः (द) कोऽपि न।

(iii) 'क्रीडति' इत्यस्मिन् पदे धातुः अस्ति—
(अ) क्री (ब) क्र (स) क्रीड् (द) क्रीडा।

(iv) 'मोदै' इत्यस्मिन् पदे लकारः अस्ति—
(अ) लट् लकारः (ब) लृट् लकारः (स) लङ् लकारः (द) लोट् लकारः।

(v) 'व्यये कृते वर्धते एव' इत्यस्मिन् वाक्यांशे अव्ययम् अस्ति—
(अ) व्यये (ब) कृते (स) वर्धते (द) एव।

प्रश्न ४. उचितविकल्पं चित्वा लिखत— 1 × 5 = 5

(i) 'प्राप्य' इत्यस्मिन् पदे प्रत्ययः अस्ति—
(अ) ल्यप् (ब) आप्य (स) यत् (द) क्तः।

(ii) दृश् + क्त्वा = ..................... भवतिः।
(अ) दृश्त्वा (ब) दृष्ट्वा (स) दृक्त्वा (द) दृत्वा।

(iii) 'तुमुन्' प्रत्ययस्य उदाहरणम् अस्ति—
(अ) गच्छतु (ब) गतवान् (स) गन्तुम् (द) गन्तुमुन्।

(iv) 'सः पाठं पठितवान्' इत्यस्मिन् वाक्ये कृदन्तयुक्तपदम् अस्ति—
(अ) पठितवान (ब) सः (स) पाठम् (द) कोऽपि न।

https://www.evidyarthi.in/

(v) धर्मो रक्षति ………………… ।

(अ) रक्षेत् (ब) भक्षेत् (स) रक्षितः (द) रक्षयेत्।

**प्रश्न ५. प्रदत्तशब्दैः रिक्तस्थानपूर्तिः करणीया—** 1 × 5 = 5

*(मणिबन्धे, वृक्षः, सोमशर्मा, रामायण, पर्वते, तिस्रः)*

(i) भारत ………… कवयित्री।

(ii) तस्य अहं ………… इति नाम करिष्यामि।

(iii) रक्षाकरण्डकमस्य ………… न दृश्यते।.

(iv) पक्षिभिः ………… हतः।

(v) अद्यावधि शैवप्रतिमाः केवलं ………… प्रसिद्धाः।

**प्रश्न ६. निम्नलिखितेषु प्रश्नेषु त्रयाणाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत—** 2 × 3 = 6

(i) भारतमाता कैः वन्दिता ?

(ii) घटः कैः सम्पूरितः ?

(iii) राज्ञा स्मृतिः कथम् उपलब्धा ?

(iv) श्रवणस्य पितरौ कीदृशौ आस्ताम् ?

(v) कृषकाः देशस्य उन्नतिं कथं कुर्वन्ति ?

**प्रश्न ७. अधोलिखितशब्देषु द्वयोः शब्दयोः रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत—** 2

(i) हरि—तृतीयाः विभक्तिः

(ii) रमा—प्रथमा विभक्तिः

(iii) साधु—षष्ठी विभक्तिः

(iv) वारि—द्वितीया विभक्तिः

**प्रश्न ८. अधोलिखितशब्देषु द्वयोः शब्दयोः रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत—** 2

(i) 'किम् पुल्लिङ्गम्'—प्रथमा विभक्तिः

(ii) 'यत् नपुंसकलिङ्गम्'—द्वितीया विभक्तिः

(iii) 'अस्मद्'—पञ्चमी विभक्तिः

(iv) 'तत् स्त्रीलिङ्गम'—तृतीया विभक्तिः।

**प्रश्न ९. अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत—** 5 × 2 = 10

(i) **चन्द्रपुरनाम्निनगरे श्रेष्ठिनः हरिदत्तस्य पुत्रः मदनविनोदस्तु अतीव विषयासक्तः कुपुत्रः पितुः शिक्षां न शृणोति स्म। तस्य द्युतमृगयावेश्यामद्यादिषु अतीव आसक्तिः। कुमार्गचारिणं तं कुपुत्रं दृष्ट्वा तत्पिता हरिदत्तः सपत्नीकः अतीव दुःखितः सञ्जातः।**

**प्रश्न—(अ)** हरिदत्तस्य पुत्रस्य नाम किम् आसीत् ?

(ब) हरिदत्तस्य पुत्रः कीदृशः आसीत् ?

(स) मदनविनोदस्य आसक्तिः केषु आसीत् ?

(द) कं दृष्ट्वा हरिदत्तः दुःखितः सञ्जातः ?

(इ) मदनविनोदः कस्य शिक्षां न शृणोति ?

(ii) **कुण्डलः कश्चन सदाचारी वृद्धः ब्राह्मणः। सः वेदशास्त्रज्ञः आसीत्। कुण्डलस्य पुत्रः सुकर्मा महान् पितृभक्तः। सः पितुः सकाशादेव वेदशास्त्रयोः अध्ययनं करोति स्म। श्रद्धया मातुः पितुश्च सेवां करोति स्म।**

**प्रश्न—(अ)** कः सदाचारी वृद्धः ब्राह्मणः ?

**(ब)** कुण्डलस्य पुत्रः कः आसीत् ?

**(स)** सुकर्मा वेदशास्त्रयोः अध्ययनं कस्य सकाशात् करोति स्म ?

**(द)** 'पुत्रः' शब्दस्य बहुवचनं लिखत।

**(इ)** सुकर्मा कयोः सेवां करोति स्म ?

https://www.evidyarthi.in/

(iii) आङ्ग्लभाषायां वेधशालाम् 'अब्जर्वेटरी' इति वदन्ति। जनाः वेधशालां 'यन्त्रभवनम्' अपि वदन्ति। एषा वेधशाला उज्जयिन्याः दक्षिणभागे क्षिप्रायाः दक्षिणतटे उन्नतभूभागे स्थिता अस्ति। प्राचीनकालात् एव उज्जयिनी ज्योतिषविद्यायाः प्रमुखं केन्द्रम्। कर्करेखा इतः एव निर्गता। इदं स्थानं गणितस्यापि आधारस्थलम् अस्ति।

प्रश्न—(अ) 'अब्जर्वेटरी' इति कां वदन्ति ?

(ब) एषा वेधशाला कुत्र स्थिता अस्ति ?

(स) उज्जयिनी कस्याः प्रमुखं केन्द्रम् ?

(द) उज्जयिनीतः का निर्गता ?

(इ) उज्जयिन्यां कस्य आधारस्थलम् अस्ति ?

प्रश्न १०. अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि— $5 \times 2 = 10$

(i) बुद्धेः फलं तत्वविचारणा च देहस्य सारं व्रतधारणं च।
अर्थस्य सारं किल पात्रदानं, वाचः फलं प्रीतिकरं नराणाम्॥

प्रश्न—(अ) कस्याः फलं तत्वविचारणा ?

(ब) वाचः फलं किम् अस्ति ?

(स) कस्य सारं पात्रदानम् ?

(द) देहस्य सारं किम् अस्ति ?

(इ) 'नराणाम्' इति पदस्य विभक्तिं वचनञ्च लिखत।

(ii) नास्ति क्षुधासमं दुःखं, नास्ति रोगः क्षुधासमः।
नास्त्याहारसमं सौख्यं, नास्ति क्रोधसमो रिपुः॥

प्रश्न—(अ) क्षुधासमं किं नास्ति ?

(ब) कः क्षुधासमः न अस्ति ?

(स) आहारसमं किं न अस्ति ?

(द) क्रोधसमः कः न अस्ति ?

(इ) 'रिपुः' शब्दस्य पर्यायवाचिशब्दं लिखत।

(iii) स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः।
समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव॥

प्रश्न—(अ) कः सर्वगुणोपेतः ?

(ब) श्रीरामः कस्याः आनन्दवर्धनः ?

(स) श्रीरामः गाम्भीर्ये कः इव ?

(द) श्रीरामः केन हिमवान् इव ?

(इ) 'सर्वगुणोपेत' पदस्य सन्धिविच्छेदं कुरुत।

प्रश्न ११. उचित-युग्म-मेलनं कुरुत (केचित् चत्वारः)— 4

| | 'अ' | 'ब' |
|---|---|---|
| (i) | अजाद्वयम् | (अ) बालस्य माता |
| (ii) | शकुन्तला | (ब) यूथम् |
| (iii) | चिदम्बरस्य | (स) निमग्नः |
| (iv) | दोषगुणाः | (द) नटराजः |
| (v) | महापङ्के | (इ) संसर्गजाः |

प्रश्न १२. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत (केचित् चत्वारः)— 4

(i) गोपालः गीतायाः गाता।

(ii) राजा बालं न लालयति।

(iii) दशरथ महाराजः आसीत्।

(iv) महाराणाप्रतापः अधीनताविषये पत्रं लिखितवान्।

(v) वालमीकिः रामायणं न लिखितवान्।

https://www.evidyarthi.in/

प्रश्न १३. निम्नलिखितेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन लिखत— 4

(i) प्रथमे का अर्जनीया ?
(ii) कस्य दोषेण गृध: हत ?
(iii) विपदि किम् आवश्यकम् ?
(iv) आरुणे: गुरो: नाम किम् ?
(v) हस्ते: नाम किम् आसीत् ?
(vi) प्रमाद: कस्मात् न कर्त्तव्य: ?

प्रश्न १४. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य कण्ठस्थीकृतं सुभाषितद्वयं लिखत। 4

प्रश्न १५. स्वप्राचार्यस्य कृते अवकाशार्थं प्रार्थनापत्रं संस्कृते लिखत। 4

*अथवा*

निमन्त्रणपत्रम् लिखत।

प्रश्न १६. अधोलिखितेषु पञ्च-अशुद्धकारकवाक्यानां शुद्धि: करणीया— 5

(i) अहं विद्यालय: गच्छामि।
(ii) मोहन: पितरं सह गच्छति।
(iii) शिवं नम:।
(iv) वृक्षस्य पत्रं पतति।
(v) पक्षी वृक्ष: अस्ति ?
(vi) मम दुग्धं रोचते।

प्रश्न १७. अधोलिखितवाक्यानां क्रमसंयोजन कुरुत— 5

(i) अत: अहं "सीताराम-सीताराम" इति वदामि।
(ii) अहं सर्वं खलु पश्यामि आचरानि च।
(iii) तत्र व्याधानां ग्राम: अस्ति।
(iv) स: शुक: व्याधस्य गृहे निवसति।
(v) अहं मुने: आश्रमे निवसामि।

प्रश्न १८. अधोलिखित-अपठितगद्यांशं सम्यक् पठित्वा संस्कृतभाषायां प्रश्नानाम् उत्तराणि लिखत— 5

**शिक्षक: छात्राणाम् अज्ञानान्धकारं दूरीकरोति। छात्रा: शिक्षकानां चरित्रस्य अनुकरणं कुर्वन्ति। अत: शिक्षकस्य समाजे राष्ट्रे च सम्मानं भवति। अस्माकं देशे प्रतिवर्ष सितम्बरमासस्य पञ्चमदिनाङ्के "शिक्षक-दिवस" आयोज्यते।**

प्रश्न—(i) अस्य गद्यांशस्य शीर्षकं लिखत।
(ii) शिक्षक केषाम् अज्ञानान्धकारं दूरीकरोति ?
(iii) के शिक्षकानां चरित्रस्य अनुकरणं कुर्वन्ति ?
(iv) कस्य समाजे राष्ट्रे च सम्मानं भवति ?
(v) अस्माकं देशे "शिक्षक-दिवस:" कदा आयोज्यते ?

प्रश्न १९. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत— 10

(i) धेनु:, (ii) पुस्तकम्, (iii) उद्यानम्, (iv) विद्या।

---

https://www.evidyarthi.in/

## उत्तर

| | | | | | |
|---|---|---|---|---|---|
| १. | (i) (स), | (ii) (अ), | (iii) (स), | (iv) (द), | (v) (स)। |
| २. | (i) (ब), | (ii) (अ), | (iii) (ब), | (iv) (ब), | (v) (अ)। |
| ३. | (i) (स), | (ii) (अ), | (iii) (स), | (iv) (द), | (v) (द)। |
| ४. | (i) (अ), | (ii) (ब), | (iii) (स), | (iv) (अ), | (v) (स)। |
| ५. | (i) रामायण, | (ii) सोमशर्मा, | (iii) मणिबन्धे, | (iv) गृध्रः, | (v) तिलः। |

| | | | | |
|---|---|---|---|---|
| ७. | (i) | हरिणा | हरिभ्याम् | हरिभिः। |
| | (ii) | रमा | रमे | रमाः। |
| | (iii) | साधोः | साध्वोः | साधूनाम्। |
| | (iv) | वारि | वारिणी | वारीणि। |
| ८. | (i) | कः | कौ | के। |
| | (ii) | यत् | ये | यानि। |
| | (iii) | मत् | आवाभ्याम् | अस्मत्। |
| | (iv) | तया | ताभ्याम् | ताभिः। |

११. (i) → (ब), (ii) → (अ), (iii) → (द), (iv) → (इ), (v) → (स)।

१२. (i) आम्, (ii) न, (iii) आम्, (iv) आम्, (v) न।

१३. (i) विद्या, (ii) मार्जारस्य, (iii) धैर्यम्, (iv) धौम्यः, (v) कर्पूरतिलकः, (vi) स्वाध्यायात्।

१७. (iii) → (iv) → (v) → (ii) → (i)।

evidyarthi
https://www.evidyarthi.in/